# ८. शङ्खारावः

तृतीयः भागः

## पठन्तु, विचिन्त्य वदन्तु

सङ्घटिता वयमिह याम । राष्ट्रसमर्चां करवाम ।
न कमपि भेदं गणयाम । अनुपमस्नेहं वितराम ।
सन्तु च कष्टशतं सततं क्रियते कार्यमिदं निरतम् ।
आशापाशशतैर्युक्तान् ध्येयामृततो दूरगतान् ।
सुप्तान् बन्धून् जागरयाम । राष्ट्रसुकर्मसु लगयाम ।
भारतमस्माकं जननी स्वर्गादपि या गरीयसी ।
विश्वगुरुं तां करवाम । जन्मसफलतां विन्दाम ।
संघटिता वयमिह याम । राष्ट्रसमर्चां करवाम ।

**प्रश्नाः ?**

1. गीतं कान् उद्दिश्य लिखितम् ?
2. कविः अनेन गीतेन अस्मान् किं बोधयति ?
3. एतदृशानि गीतानि कुत्रापि श्रुतवान् वा ?

© SCERT not to be republished

## उद्देश्यम्

* छात्रेषु देशभक्तेः विकासः ।
* देशविकासाय आत्मना कर्तव्यानां कार्याणां विषये जागरूकतायाः उत्पादनम् ।
* भारतीयाः सर्वे समानाः इति भावनायाः विकासः ।

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगाहनम् अभिवर्धयन्तु ।




1. प्रयाहि तूर्णं विक्रान्तमणे ! प्रयाहि पुरतो विक्रान्तमणे ।
   जवेन भारतपुरोगतौ निजकवोष्णरक्तं बहूपयोक्तुम् ॥ प्रयाहि ॥
2. अपेहि दूरं हताश शीघ्रम् उपेहि पुरतः कृताशधीरम् ।
   निरस्य प्रगतेर्विरोधिवर्गम् पुरोगतिं निजराष्ट्रं नेतुम् ॥ प्रयाहि ॥
3. स्वराज्यमधुना श्रेयोराज्यं निरन्तरायं प्रयस्य कर्तुम् ।
   स्वयं पुरोगमतपोनुरूपं प्रयोगसिद्धिं लभस्व नियतम् ॥ प्रयाहि ॥
4. प्रजाधनेन च सुखानुभूतिं भजन्ति ये ये कृताधिकाराः ।
   प्रजाद्रुहस्तान् नराधमानपि निजाधिकारान्निपातयन्तु ॥ प्रयाहि ॥
5. पदैकमोहात् प्रजाप्रशासनविदारणं वा कदापि मा कुरु ।
   स्वलाभदृष्ट्या प्रजैकताया विलोपमथवा कदापि माकुरु ॥ प्रयाहि ॥
6. विहाय भाषाप्रान्तविरोधम् सहायभूतावयमन्योन्यम् ।
   जगन्नुतासु क्रियासु नूनम् प्रगाढमुन्नतिमवाप्नुवाम ॥ प्रयाहि ॥
7. करानेके पदोऽप्यनेके स्वरा अनेके मुखान्यथाऽपि ।
   विभाति हृदयं तुल्यस्पन्दं प्रभूतमस्माकमेकमेव ॥ प्रयाहि ॥

**श्रीभाष्यं विजयसारथिः**

## सारांशः

1. हे पराक्रमिषु श्रेष्ठ ! वेगेन अग्रतः प्रयाहि (प्रयाणं कुरु) । देशस्य अस्य सर्वतोमुखाभिवृद्धये निजकदुष्णरक्तं बहुधा उपयोक्तव्यम् ।

2. निराशावादात् शीघ्रं दूरं गच्छ, आशोन्मुखः सन् धैर्येण अग्रे गच्छ । प्रगतिविरोधिनः तिरस्कृत्य स्वराष्ट्रम् उन्नतपथे नेतुं परिश्रमं कुरु ।

3. एनम् अस्माकं देशं निरन्तरायं श्रेयोराज्यं कर्तुं यत्नं कुरु । स्वयम् अग्रेसरो भूत्वा निजतपोऽनुरूपं फलं निश्चयेन प्राप्नुहि ।

4. प्रजाधनेन अधिकारं प्राप्य भोगभाग्यान् अनुभवन्तः प्रजाः एव दूषयन्तः ये नायकाः वर्तन्ते तान् पदच्युतान् कुरु ।

5. पदवीव्यामोहेन राज्यप्रशासने बाधां मा उत्पादय । स्वलाभार्थं प्रजानाम् एकतायाः नाशं मा कुरु ।

6. भाषाविषये प्रान्तविषये वा विरोधं त्यक्त्वा वयं सर्वे परस्परसहायकाः भवेम । सम्पूर्णविश्वे प्रशंसनीयानि कार्याणि कृत्वा समुन्नतविकासं प्राप्नुयाम ।

7. अस्माकं हस्ताः अनेके । अस्माकं पादानि च अनेकानि । अस्माकं कण्ठगतस्वराश्च अनेके । मुखानि च अनेकानि तथापि अस्माकं सर्वेषां हृदयमेकमेव ।

वयं सर्वे मिलित्वा देशोन्नत्यै कटिबद्धाः भवेम ।

© SCERT not to be republished

## कविपरिचयः

श्रीमान् श्रीविजयसारथिः वाचस्पतिबिरुदाञ्चितः महाकविः । आबाल्यात् संस्कृतेन एव सहजसुन्दरतया भावस्फोरकतया पद्यानां रचनायां सिद्धहस्तः एषः महोदयः शताधिकग्रन्थानां रचयिता ।

आन्ध्रप्रदेशे करीम्नगरजनपदतः अनतिदूरे वर्तमानः ‘‘इरुकुल्ल’’ नामकग्रामः महाकवेः जन्मना प्रसिद्धः । अयं महाकविः वरंगल्विश्वेश्वरसंस्कृतान्ध्रकलाशालायाम् अध्यापनकार्यं बहूनि वर्षाणि कृत्वा निवृत्तः । उत्तरतेलंगानाप्रान्ते अनेकदेवालयानां स्थापने महोदयस्य प्रेरणा अनितरास्ति ।

स्वयं ‘‘सर्ववैदिकसंस्थानस्य’’ कुलपतित्वेन यज्ञवराहक्षेत्रस्य च गौरवाध्यक्ष्यं निर्वहन् निरन्तरं ग्रन्थानां पठनपाठने एवं रचनाव्यवसाये च कालं यापयन्नयं कविः कमनीयकाव्यकवनक्षेत्रे नित्यकृषीवलः इवास्ते ।

## एतानि कुर्वन्तु

### I. भावावगाहनम् - प्रतिस्पन्दनम्

**अ. अधः दत्तानां प्रश्नानां समाधानानि विचिन्त्य वदन्तु ।**

१. सर्वतोमुखाभिवृद्धिः इत्यस्य कः अर्थः ?

२. कवितानां भावं स्ववाक्यैः वदन्तु ।

३. प्रजाधनेन सुखानुभूतिं भजन्ति अधिकारिणः । अमुं विषयमधिकृत्य चर्चां कुर्वन्तु ।

४. कविः कान् उद्दिश्य कवितां लिखितवान् ?

**आ. पाठं पठित्वा अव्ययपदानाम् अधः रेखाङ्कनं कुर्वन्तु ।**

**इ. एकार्थभावनासूचककवितायाः पङ्क्तीनाम् अधः रेखाङ्कनं कुर्वन्तु ।**

**ई. अधः दत्तम् अनुच्छेदं पठित्वा अधः निदिष्टानि कार्याणि कुर्वन्तु ।**

लाल्बहदूरशास्त्रिमहोदयः उत्तरप्रदेशस्य वारणासीजनपदे 1904 तमे वर्षे अक्टोबर्मासस्य 2 दिनाङ्के जन्म प्राप्तवान् । अस्य पितरौ रामदुलारीशारदाप्रसादौ । एषः वारणासीस्थे हरिश्चन्द्रविद्यालये शिक्षां प्राप्य उच्चशिक्षां पठितुं काशीविद्यापीठं गतवान् । महात्मागान्धीमहोदयस्य नेतृत्वे सञ्चालिते स्वतन्त्रतान्दोलने सोऽपि प्रविष्टवान् । आङ्ग्लेयानां शासनेन प्रदत्तं वर्षद्वयात्मककारावासम् अपि अनुभूतवान् । निःस्वार्थभावनया कर्तव्यनिष्ठया सततं भारतस्य सेवाकरणात् स जनतायाः श्रद्धाभाजनम् अभवत् ।

१. अनुच्छेदाधारेण पञ्चप्रश्नानां निर्माणं कुर्वन्तु ।

२. अनुच्छेदस्य शीर्षिकां लिखन्तु ।

**उ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. देशस्य सर्वतोमुखाभिवृद्धिः कथं भवति ?

२. कवेः दृष्टौ अधिकारिणः कथं सन्ति ?

३. आतङ्कविप्लवौ कुत्र न करणीयौ ?

४. श्रेयोराज्यमिव एतत् राज्यं कर्तुं कीदृशानि कार्याणि करणीयानि ?

५. कविः अस्मान् कथं वर्णितवान् ?

© SCERT not to be republished

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. ''निराशावादतः शीघ्रं दूरं गच्छ'' इति कविः किमर्थं वदति ?

२. अस्याः कवितायाः लेखने उद्देशः कः ?

३. प्रजाधनं नेतारः कुत्र - कुत्र दुर्विनियोगं कुर्वन्ति । तस्य निवारणं कथं करणीयम् ?

४. प्रजाधनं प्रजाभ्यः कथं विनियोक्तव्यम् ?

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. कवितायाः सारं स्वीयवाक्यैः लिखन्तु ।

२. आधुनिकसमाजे प्रजाधनस्य दुर्विनियोगः कथं भवति ।

### इ. सर्जनात्मकतया समाधानानि लिखन्तु ।

१. प्रजाधनस्य सद्विनियोगम् अधिकृत्य करपत्रमेकं रचयन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

హిమాలయం మొదలుకొని హిందూమహాసముద్రం వరకు ఉన్నట్టి ప్రదేశమే భారతదేశం. భరతావని, భరతవర్షము, భరతఖండమని భారతదేశానికి ప్రాచీన నామములు. భారతీయసంస్కృతి అన్ని దేశాల వారికి మార్గదర్శకమైనది. అట్లే సంస్కృతి సంస్కృతభాషలో నిక్షిప్తమై ఉన్నది. సనాతన భారతీయసంస్కృతికి నాలుగు వేదాలు మూలస్తంభాలు.

### ई. प्रशंसात्मकतया प्रतिस्पन्दनं कुर्वन्तु ।

भारतीयेषु एकतावर्धनाय किं किं कर्तुं शक्यते ?

## III. भाषांशाः

### 1. पदजालाभिवृद्धिः

### अ. अधः दत्तानां शब्दानां प्रथमाविभक्त्यन्तरूपाणि लिखन्तु ।

**उदा** - जनपदे - जनपदम्

| | | | |
|---|---|---|---|
| १. वर्षे | ............ | २. दिनाङ्के | ............ |
| ३. विद्यालये | ............ | ४. विद्यापीठे | ............ |
| ५. अग्रे | ............ | ६. गृहे | ............ |
| ७. वृक्षे | ............ | | |

© SCERT not to be republished

### आ. अधः दत्तानि पदानि उपयुज्य वाक्यानि रचयन्तु ।

१. अपि

२. सततं

३. नेतृत्वे

४. आन्दोलने

### इ. अधः दत्तानि पदानि पठन्तु । तेषां विरुद्धार्थकपदानि कवितायाः चित्वा लिखन्तु ।

| | |
|---|---|
| १. मन्देन | २. उपेहि |
| ३. अन्तरायं | ४. दूषयन्ति |
| ५. भिन्नतया | ६. इमे |
| ७. हताशा | ८. विभाति |

## 2. साहित्यांशाः

### अ. अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च अवगच्छन्तु ।

| | | | | |
|---|---|---|---|---|
| U U I | U I I | I U I | I U I | U U |
| श्री च क्र | रा ज नि | ल ये शि | शु च न्द्र | चू डे |
| त | भ | ज | ज | ग ग |

**एवं प्रकारेण क्रमशः ' त - भ - ज - ज - ग - ग' इतीमे गणाः वर्तन्ते चेत् 'वसन्ततिलकाच्छन्दः' भवति ।**

**वसन्ततिलकाच्छन्दोवृत्तस्य लक्षणम् ।**

१. श्लोके पादचतुष्टयं भवति ।

२. प्रतिपादं क्रमेण 'त-भ-ज-ज-ग-ग' इतीमे गणाः भवन्ति ।

३. प्रतिपादं चतुर्दश अक्षराणि भवन्ति ।

**"उक्ता वसन्ततिलका तभजाजगौ गः"**

### आ. अधः दत्तस्य श्लोकद्वयस्य पादानां लघुगुरुनिरूपणपुरस्सरं गणविभजनं कृत्वा समन्वयं कुर्वन्तु ।

1. निन्दन्तु नीतिनिपुणाः यदि वास्तुवन्तु
लक्ष्मीस्समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा ।
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।

© SCERT not to be republished

2. श्रीराम राम रघुवंशगुणाभिराम
सीतामनःकुमुदसोमसुरारिभीम ।
निष्कामधामविधुमौलिकृतप्रणाम
रामाजिपेटपरमादर सुप्रभातम् ।

**परियोजनाकार्यम्**

प्रजाधनस्य सद्विनियोगसम्बद्धानि चित्राणि वार्तापत्रिकादिभ्यः सङ्कलय्य भित्तिपत्रेषु संलिप्य प्रदर्शयन्तु ।

## विषयविस्तरः

### अष्टादश पुराणानि

पुराऽपि नवानि पुराणानि । व्यासमहर्षिणा अष्टादशपुराणानि उपपुराणानि च प्रणीतानि । वेदे प्रतिपादितधर्मतत्त्वं पुराणानि मित्रसम्मिततया प्रबोधयन्ति । पुराणानां शैली सरला प्रेरिका च भवति । अष्टादश पुराणानि एकस्मिन्नेव श्लोके सूचितानि । स च श्लोकः

**"मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।**
**अ - ना - प - लिं - ग - कू - स्कानि पुराणानि प्रचक्षते ॥ इति ॥**

क्रमेण अष्टादशपुराणानां नामानि अधः सूच्यन्ते ।

| | | |
|---|---|---|
| १. मत्स्यपुराणम् | २. मार्कण्डेयपुराणम् | ३. भविष्यपुराणम् |
| ४. भागवतपुराणम् | ५. ब्रह्मपुराणम् | ६. ब्रह्माण्डपुराणम् |
| ७. ब्रह्मवैवर्तपुराणम् | ८. वामनपुराणम् | ९. वराहपुराणम् |
| १०. विष्णुपुराणम् | ११. वायुपुराणम् | १२. अग्निपुराणम् |
| १३. नारदपुराणम् | १४. पद्मपुराणम् | १५. लिङ्गपुराणम् |
| १६. गरुडपुराणम् | १७. कूर्मपुराणम् | १८. स्कान्दपुराणम् |

**अजरामरवत्प्राज्ञो विद्यामर्थं च साधयेत् ।**

© SCERT not to be republished